## Appendix - 7

### Enlogies of Gokulanāthajī

श्रीगोकुलेशाष्टक of कृष्णराय and हरिरायजी etc.

।१। यतिवशधरणीशे धर्मलोपं प्रवृत्ते हरिचरणसहायो यः स्वधर्मं जुगोप ।
विहितभजनभारो धर्मरक्षावतारः स जगति जयति श्रीवल्लभो गोकुलेशः ॥१॥
असदुदितविदारी वेदवादानुसारी सदुचितहितकारी भक्तिमार्गप्रचारी।
रुचिरतिलकधारी मालधारी तुलस्याः स जयति जयति श्रीवल्लभो गोकुलेशः।२।
बहुविधजननर्मवाक्यबाणैरधर्मः प्रकटमयति मर्मस्फोटमाराद्विधाय ।
वपुषि भजनवर्म प्राप्य कल्याणधर्मः स जयति नवकर्मा गोकुले गोकुलेशः ॥३॥
निगमजनविधर्मद्रोहिणि क्षोणिनाथे सकलसदजवेशस्तत्समीपं समेत्य ।
तदुचितमदमत्या दत्तवानुत्तरं यः स जयति जनचित्तानंदको गोकुलेशः ॥४॥
अधिकृतयुगधर्मे वर्धमाने समन्तादनितरशरणोऽसौ वेदधर्मो यदाभूत्।
तदिह शरणमागाद् यः सदैकः शरण्यं सजयति जनबंधो गोकुले गोकुलेशः ॥५॥
कलिवृषलभयाप्तौ तत्कलिं संनिगृह्य क्षितिपतिरविता सीद्यस्य पूर्वं परीक्षित्।
इह हि नृपतिभीते तस्य धर्मस्य नित्यं सजयति भुवि गोप्ता गोकुले गोकुलेशः।६।
प्रथममिह परीक्षिद्रक्षितः वर्णधर्मः पुनरपि कलिकल्पक्षुद्रभिक्षुक्षतोऽभूत् ।
अभयपदमिदं यं शाश्वतं चाभ्युपेतः स जयति निजभक्ताह्लादको गोकुलेशः॥७॥
य इह हि सकललोके केवलं न स्वकीये प्रभुभजनबलेन स्थापयामास धर्मम् ।
सकलसुखविधाता गोकुलानंददाता स जयति निजतातारोधको गोकुलेशः ॥८॥
श्रीवल्लभाष्टकमिदं पठति ~~यः कृष्णस्य~~ प्रपन्नो यः कृष्णरायकृतमित्युषसि स्वचित्तः।
सोऽयं सुदुर्लभतमानपि निश्चयेन प्राप्नोति वै विनिर्दिष्टानखिलान्पदार्थान्।।९।।

- कृष्णरायस्य

।२। उद्धर्तुं धरणीतले निजबलेनैव स्वकीयान् जनान्।
आविर्भूय तथा कृपापरवशः श्रीविठ्ठलेशालये ।
यः श्रीभागवतस्य तत्त्वविवृतिश्चक्रे प्रवाहं वचः,
पीयूषैरतिपोषणाय सततं श्रीगोकुलेशोऽवतु ॥१॥

यः पुष्टिमार्गगतभावविभावनैकदक्षः समक्षमपि सन्निधिसेवकानाम्।
यो ज्ञानगूढहृदयः सदयः सदैव सेवासुखं मम तनोतु स गोकुलेशः ।।२।।
यः सेव्यः सततं सतां निजफलप्राप्त्यावदावर्तिना -
माचार्योदितशुद्धपुष्टिसुपथे नित्यानुकम्पाधरः ।
यद्दृष्ट्यैव हृदंधकारनिचयो यायात्क्षणात्क्षीणता -
मानंदं मुहुरातनोतु मधुराकारः प्रभुर्वल्लभः ।।३।।
यो मायामतवर्तिदुष्टवदनध्वंसं वचोभिर्निजैः
कुर्वन्सेवकसर्वलोकहृदयानंदं सदा पोषयन् ।
तद्भावं सुदृढं करोति कृपया दासैकहृद्या तया
मातानां शरणं हृदा स मनसां मोदे सदा यच्छतु ।।४।।
हसद्वदनपंकजस्फुरदमन्दभावार्द्रदृक्
कपोलविलसद्रजोव्दयविमिश्रतांबूलदः।
समुन्नतसुनासिकः सरसचारुबिंबाधरो
हरत्वखिलसेविनां चिरवियोगतापं क्षणात् ।।५।।
मनोजमधुराकृतिर्निजमनोविनोदोद्गति -
कृते जनमनोहृती विरतिकारकः संसृती ।
स्वभावपरिपोषको भवसमुद्रसंशोषकः
करोतु वरणं सदा सफलमत्र वै वल्लभः ।।६।।
गोधूमभेचकमनोहरवर्णदेहो यः केशकृष्णनिचयोल्लसदुत्तमांगः।
सूक्ष्मोत्तरीयकटिवस्त्रविराजितांगः शं तनोतु मुदमद्भुतगोकुलेशः ।।७।।
तातांघ्रिकपरायणाशयविद्वांश्च यः परानंददो
माला येन सुरक्षिता निजमहायत्नेन कंठे सताम्।
धर्मो येन विधर्षितः पितृपदाचारैः सदा सर्वतः
स श्रीगोकुलनायकः करुणया भूयाद्वशी सेविनाम् ।।८।।

सर्वं साधनजातमत्र विकलं नूनं विदित्वा जनाः
नित्यं तं भजत प्रियं प्रभुमयं त्यक्त्वेतरस्याश्रयम् ।
तन्नामानि जपंतु रूपमखिलं संचिंतयंतु स्वयं
सौख्यं तत्प्रभावतोऽखिलमिदं सर्वं स्वतः प्राप्स्यते ।।९।।

।३। कृष्णरायस्य नामरत्नमालावल्याम् -
गोकुलानंदकर्ता च गोकुलाधिपभूषणम्। गोवल्लभो गोकुलेशो गोकुल -
प्रीतिकारकः ।।११।।
आचार्यकृतसिद्धांतग्रंथव्याख्यानकारकः। पितामहपदासक्तः पितृपदाब्जभक्तिमान्
।।१२।।
मुखनिक्षिप्ततांबूलचर्वितारुणसद्विजः। पक्वबिंबाधरोऽनन्यभक्तदत्ताधरामृतः।२१।
सुमुखः सुंदरग्रीवः सुकपोलः सुनासिकः। सकर्णयुगविन्यस्तसुवर्णमणिकुंडलः ।।२२।।

There are also मधुराष्टक by रूपाबाई, वल्लभाष्टक/पदी by तारासेवक, गोकुलेशनामावली by हरिरायजी, रुचिराष्टक by हरिदास, अष्टकम् by गोकुलदास, गोकुलनाथाष्टक of some unknown followers, गोकुलेशस्तव by कृष्णराय, गोकुलेशाष्टोत्तरशतनाम by विष्णुदास, पादुकाष्टक by उद्धव, बाललीलाष्टक by हरिदास and many other eulogies in the regional tongues.